# वैयाकरणसिद्धान्तकौमुदी

## हलन्तनपुंसकलिङ्गप्रकरणम् (०६)

## १७.०९.२०१२

- तिरः अञ्चति
- तिरस् अन्च् (क्विन्) व् (‘ऋत्विग्दधृक्..’ - ३.२.५९)
- गत्यर्थे,
- तिरस् अच् व् (‘अनिदितां हल..’ - ६.४.२४)
- तिरस् अच् (‘वेरपृक्तस्य’ - ६.१.६७)

- तिरस् अच् स्
- तिरस् अच् ('स्वमोर्नपुंसकात्' - ७.१.२३)
- तिरि अच् ('तिरसस्तिर्यलोपे' - ६.३.९४)
- तिर्यच् ('इको यणचि' - ६.१.७७)
- तिर्यक् ('चोः कुः' - ८.२.३०)
- तिर्यग् ('झलां जशोऽन्ते' - ८.२.३९)
- तिर्यक् ('वाऽवसाने' - ८.४.५६)

- तिरस् अच् औ
- तिरस् अच् (शी) ई ('नपुंसकाच्च' - ७.१.१९)
- तिरस् च् ई ('अचः' - ६.४.१३८)
- तिरश्ची ('स्तोः श्चुना श्चुः' - ८.४.४०)

- तिरस् अच् (जस्) अस्
- तिरस् अच् (शि) इ ('जश्शसोः शिः' - ७.१.२०)
- तिरस् अन्च् इ ('नपुंसकस्य झलचः' - ७.१.७२)
- तिरि अन्च् इ ('तिरसस्तिर्यलोपे' - ६.३.९४)
- तिर्यन्चि ('इको यणचि' - ६.१.७७)
- तिर्यंचि ('नश्चापदान्तस्य झलि' - ८.३.२४)
- तिर्यञ्चि ('अनुस्वारस्य ययि परसवर्णः' - ८.४.५८)

- पूजायां तु नलोपो न,
- तिरस् अन्च् स्
- तिरस् अन्च् ('स्वमोर्नपुंसकात्' - ७.१.२३)
- तिरि अन्च् ('तिरसस्तिर्यलोपे' - ६.३.९४)
- तिर्यन्च् ('इको यणचि' - ६.१.७७)
- तिर्यन् ('संयोगान्तस्य लोपः' - ८.२.२३)
- तिर्यङ् ('क्विन्प्रत्ययस्य कुः' - ८.२.६२)

- तिरस् अन्च् औ
- तिरस् अन्च् ई ('नपुंसकाच्च' - ७.१.१९)
- तिरि अन्च् ई ('तिरसस्तिर्यलोपे' - ६.३.९४)
- तिर्यन्ची ('इको यणचि' - ६.१.७७)
- तिर्यंची ('नश्चापदान्तस्य झलि' - ८.३.२४)
- तिर्यञ्ची ('अनुस्वारस्य ययि परसवर्णः' - ८.४.५८)

- तिरस् अन्च् (जस्) अस्
- तिरस् अन्च् (शि) इ (‘जश्शसोः शिः’ - ७.१.२०)
- तिरि अन्च् इ (‘तिरसस्तिर्यलोपे’ - ६.३.९४)
- तिर्यन्चि (‘इको यणचि’ - ६.१.७७)
- तिर्यंचि (‘नश्चापदान्तस्य झलि’ - ८.३.२४)
- तिर्यञ्चि (‘अनुस्वारस्य ययि परसवर्णः’ - ८.४.५८)

- शेषं पुंवत् ।

- पकारान्तः नपुंसकलिङ्गः स्वप् शब्दः ।
- स्वप्/स्वब् ।
- स्वपी ।
- नित्यात् परादपि नुमः प्राक् ‘अप्तृन्..’ इति दीर्घः, प्रतिपदोक्तत्वात् ।
- ‘अप्तृन्..’ (६.४.११)
- ‘नपुंसकस्य झलचः’ (७.१.७२)
- उपधादीर्घे कृते अकृते च नुम् भवति, नुमि कृते तु उपधात्वाभावाद् दीर्घः न भवति ।
- स्वाम्पि ।

- ‘निरवकाशत्वं प्रतिपदोक्तत्वम्’ इति पक्षे तु प्रकृते तद्विरहात् नुमेव ।
- स्वम्पि ।

- स्वपा ।
- ‘अपो भि’ (७.४.४८)
- स्वद्भ्याम् ।
- स्वद्भिः ।

# षकारान्ताः नपुंसकलिङ्गाः

- षकारान्तः नपुंसकलिङ्गः धनुष् शब्दः
- ‘अर्तिपॄवपि..’ इत्यादिना धनेरुस् ।
- धन धान्ये + उस् (‘अर्तिपॄवपियजितनिधनितपिभ्यो नित्’ - उणादिसूत्रम्)
- धन् उस्
- धनुष् (‘आदेशप्रत्यययोः’ - ८.३.५७)
- धनुष् स्
- धनुष् (‘स्वमोर्नपुंसकात्’ - ७.१.२२)
- षत्वस्य असिद्धत्वाद् रुत्वम् ।
- धनुर् (‘ससजुषो रुः’ - ८.२.६६)
- **धनुः** (‘खरवसानयोर्विसर्जनीयः’ - ८.३.१५)

- धनुषी

- धनुस्(जस्) अस्
- धनुस् (शि) इ
- धनुन् स् इ (‘नपुंसकस्य झलचः’ - ७.१.७२)
- धनून् स् इ (‘सान्तमहतः संयोगस्य’ - ६.४.१०)
- धनूंसि (‘नश्चापदान्तस्य झलि’ - ८.३.२४)
- धनूंषि (‘नुम्विसर्जनीयशर्व्यवायेऽपि’ - ८.३.५८)

- धनुषा, धनुर्भ्याम् ।
- एवं चक्षुर्हविरादयः ।

- पिपठिषतेः क्विप्, ‘र्वोरुपधाया..’ इति दीर्घः ।
- पिपठिष (क्विप्) व्
- पिपठिष् व् ('अतो लोपः' - ६.४.४८)
- पिपठिष् ('वेरपृक्तस्य' - ६.१.६७)

- पिपठिष् स्
- पिपठिष् ('स्वमोर्नपुंसकात्' - ७.१.२२)
- पिपठिर् ('ससजुषो रुः' - ८.२.६६)
- पिपठीर् ('र्वोरुपधाया दीर्घ इकः' - ८.२.७६)
- पिपठीः ('खरवसानयोः..' - ८.३.१५)

- पिपठिषी ।

- अल्लोपस्य स्थानिवत्त्वाद् झलन्तलक्षणो नुम् न ।
- स्वविधौ स्थानिवत्त्वाभावाद् अजन्तलक्षणोऽपि नुम् न ।
- पिपठिषि ।

- पिपठीभ्र्याम् इत्यादि पुंवत् ।

# सकारान्ताः नपुंसकलिङ्गाः

- सकारान्तः नपुंसकलिङ्गः पयस् शब्दः ।
- 'पयः क्षीरं पयोऽम्बु च' इत्यमरः ।

- पयस् स्
- पयस् ('स्वमोर्नपुंसकात्' - ७.१.२२)
- पयर् ('ससजुषो रुः' - ८.२.६६)
- पयः ('खर..' - ८.३.१५)

- पयसी

- पयस् (जस्) अस्
- पयस् (शि) इ ('जश्शसोः शिः' - ७.१.२०)
- पयन् स् इ ('नपुंसकस्य झलचः' - ७.१.७२)
- पयान् सि ('सान्तमहतः संयोगस्य' - ६.४.१०)
- पयांसि ('नश्चापदान्तस्य झलि' - ८.३.२४)

- पयसा
- पयोभ्याम्
  - रुत्वम्, 'हशि च' इति उत्वम् ।

- सकारान्तः नपुंसकलिङ्गः सुपुंस् शब्दः ।
- शोभनः पुमान् यस्य तत् ।
- सुपुम्
  - सोर्लुक्, संयोगान्तस्य सकारस्य लोपः
- सुपुंसी

- सुपुंस् (जस्) अस्
- सुपुंस् (शि) इ
- सुपुमस्  इ   (‘पुंसोऽसुङ्’ - ७.१.८९)
- सुपुमन् स् इ (‘नपुंसकस्य झलचः’ - ७.१.७२)
- सुपुमान् सि  (‘सान्तमहतः संयोगस्य’ - ६.४.१०)
- सुपुमांसि     (‘नश्चापदान्तस्य झलि’ - ८.३.२४)

- सकारान्तः नपुंसकलिङ्गः अदस् शब्दः ।
- अदः
  - सोर्लुक्, रुत्वविसर्गौ ।
- विभक्तिकार्यम्, उत्वमत्वे - अमू ।
- अमूनि
  - त्यदाद्यत्वम्, जसः शिः, नुम्, उपधादीर्घः, उत्वमत्वे ।
- शेषं पुंवत् ।

# अव्ययप्रकरणम्

# ४४७. स्वरादिनिपातमव्ययम् (१.१.३७)

- पदद्वयम् । स्वर्-आदि-निपातम्, अव्ययम् ।
- स्वरादयः निपाताः च अव्ययसंज्ञाः स्युः ।
- स्वरादिः आकृतिगणः ।
- ‘प्राग्रीश्वरान्निपाताः’ (१.४.५६) इति निपातसंज्ञा ‘अधिरीश्वरे’ (१.४.९७) इति सूत्रपर्यन्तम् अधिक्रियते । तत्र पठिताः निपाताः अपि अव्ययसंज्ञां प्राप्नुवन्ति ।
- ‘चादयोऽसत्त्वे’ (१.४.५७) - चादिरपि आकृतिगणः ।